पथगात्मानं गोपयत्युग्रमूर्द्धनि"। अत्र 'पश्यन्तीति' कविप्रौढ़ोक्तिसिद्धेन काव्यलिङ्गालङ्कारेण न केऽप्यन्ये दातारस्तत्र सदृशा इति व्यतिरेकालङ्कारोऽसंलक्ष्यपदद्योत्यः। एवमन्येष्वर्थशक्तिमूलसंलक्ष्यक्रमभेदेषूदाहार्य्यम्। तदेवं ध्वनेः पूर्व्वोक्तेष्वष्टादशसु भेदेषु मध्ये शब्दार्थशक्त्युत्थो व्यङ्ग्यो वाक्यमात्रे भवन्नेकः। अन्ये पुनः सप्तदश वाक्ये पदे चेति चतुस्त्रिंशदिति पञ्चत्रिंशद्भेदाः" वृत्तिः।

"प्रबन्धेऽपि मतो धीरैरर्थशक्त्युद्भवो ध्वनिः" सू०।

"प्रबन्धो महावाक्यम्। अनन्तरोक्तद्वादशभेदोऽर्थशक्त्युत्थः। यथा महाभारते गृध्रगोमायुसंवादे "अलं स्थित्वा श्मशानेऽस्मिन् गृध्रगोमायुसङ्कुले। कङ्कालबहुले घोरे सर्वप्राणिभयङ्करे। न चेह जीवितः कश्चित् कालधर्म्ममुपागतः। प्रियो वा यदि वा द्वेष्यः प्राणिनां गतिरीदृशी"। इति दिवसे शक्तस्य गृध्रस्य श्मशाने मृतं बालमुपादाय तिष्ठतां दिवसे तं परित्यज्य गमनमिष्टम्। "आदित्योऽयं स्थितो मूढाः! स्नेहं कुरुत साम्प्रतम्। बहुविघ्नो मुहूर्त्तोऽयं जीवेदपि कदाचन। अमुं कनकवर्णाभं बालमप्राप्तयौवनम्। गृध्रवाक्यात् कथं बालास्त्यजध्वमविशङ्किताः"। इति निशि समर्थस्य गोमायोर्दिवसे परित्यागोऽनभिलषित इति वाक्यसमूहेन द्योत्यते। अत्र स्वतःसम्भवी व्यञ्जकः। एवमन्येष्वेकादशभेदेषूदाहार्य्यम्। एवं वाच्यार्थस्य व्यञ्जकत्वे उदाहृतम्। लक्ष्यार्थस्य यथा "निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः। मिथ्यावादिनि! दूति! बान्धवजनस्याज्ञातपीडागमे! वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम्"। व्यङ्ग्यार्थस्य यथा "उअ णिच्चल णिप्पन्दा भिसिणीपत्तम्मि रेहइ बलाआ। णिम्मलमरगअभाअणपरिट्ठिआ संखसुत्तिव्व"। अनयोः स्वतःसम्भविनौ लक्ष्यव्यङ्ग्यार्थौ व्यञ्जकौ। एवमन्येष्वेकादशभेदेषूदाहार्य्यम्" वृत्तिः।

"पदांशवर्णरचनाप्रबन्धेष्वस्फुटक्रमः। असंलक्ष्यक्रमव्यङ्ग्यो ध्वनिस्तत्र पदांशगः" सू०।

"प्रकृतिप्रत्ययोपसर्गनिपातादिभेदादनेकविधः। यथा "चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं रहस्याख्यायीव स्वनसि मृदु कर्णान्तिकचरः। करं व्याधुन्वत्याः पिबसि रतिसर्व्वस्वमधरं वयं तत्त्वान्वेषान्मधुकर! हतास्त्वं खलु कृती"। अत्र 'हताः' इति न पुनर्दुःखं प्राप्तवन्त इति हन्प्रकृतेः। "उद्धरकुलिसंदृताधरौष्ठं प्रतिषेधाक्षरविक्लवाभिरामम्। मुखमंसविवर्त्ति पक्ष्मलाक्ष्याः कथमप्युन्नमितं न चुम्बितन्तु"। अत्र 'तु' इति निपातस्यानुतापव्यञ्जकत्वम्। "न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः, सोऽप्यत्रैव निहन्ति राक्षसकुलं, जीवत्यहो रावणः। धिग्धिक् शक्रजितं, प्रबोधितवता किं कुम्भकर्णेन वा? स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः" 'अरयः' इति बहुवचनस्य, 'तापसः' इत्येकवचनस्य, 'अत्रैवेति' सर्व्वनाम्नः, 'निहन्तीति' 'जीवतीति' च तिङः 'अहो' इत्यव्ययस्य, 'ग्रामटिकेति कप्रत्ययतद्धितस्य, 'विलुण्ठनेति' व्युपसर्गस्य, 'भुजैरिति' बहुवचनस्य व्यञ्जकत्वम्। "आहारे विरतिः समस्तविषयग्रामे निवृत्तिः परा, नासाग्रे नयनं, तदेतदपरं यच्चैकतानं मनः। मौनञ्चेदमिदञ्च शून्यमधुना यद्विश्वमाभाति ते तद्ब्रूयाः सखि! योगिनी किमसि भोः! किं वा वियोगिन्यसि"। अत्र तु 'आहार इति' विषयसप्तम्याः, 'समस्तेति' 'परेति' च विशेषणद्वयस्य, 'मौनं' चेदमिति' प्रत्यक्षपरामर्शिनः सर्वनाम्नः, 'आभातीति' उपसर्गस्य, 'सखीति' प्रणयस्मारणस्य, 'असि भोः' इति सोपहासोत्प्रासस्य, 'किं वा' इत्युत्तरपक्षदार्ढ्यसूचकस्य वाशब्दस्य, 'असीति' वर्त्तमानोपदेशस्य, तत्तद्विशेषव्यञ्जकत्वं सहृदयसंवेद्यम्। वर्णरचनयोरुदाहरिष्यते। प्रबन्धे महाभारते शान्तः। रामायणे करुणः मालतीमाधवरत्नावल्यादौ शृङ्गारः। एवमन्यत्र"। वृत्तिः।

"तदेवमेकपञ्चाशद्भेदास्तस्य ध्वनेर्म्मताः। सङ्करेण त्रिरूपेण संसृष्ट्या चैकरूपया। वेदखाग्निशराः ५३०४ शुद्धैरिषुबाणाग्निसायकाः" ५३५५ सू०

"शुद्धैः शुद्धभेदैरेकपञ्चाशता योजने इत्यर्थः। दिङ्मात्रं तूदाह्रियते। "अत्युन्नतस्तनयुगा तरलायताक्षी द्वारि स्थिता तदुपयानमहोत्सवाय। सा पूर्णकुम्भनवनीरजतोरणस्रक्सम्भारमङ्गलमयत्नकृतं विधत्ते"। अत्र 'स्तनावेव पूर्णकुम्भौ, दृष्टय एव नवनीरजस्रज इति' रूपकध्वनिरसध्वन्योरेकाश्रयानुप्रवेशः सङ्करः। "धिन्वन्त्यमूनि मदमूर्च्छदलिध्वनीनि धूताध्वनीनहृदयानि मधोर्दिनानि। निस्तन्द्रचन्द्रवदनावदनारविन्दसौरभ्यसौहृदसगर्व्वसमीरणानि"। अत्र निस्तन्द्रेत्यादिलक्षणामूलध्वनीनां संसृष्टिः। अथ गुणीभूतव्यङ्ग्यम्"। वृत्तिः

"अपरन्तु गुणीभूतव्यङ्ग्यं वाच्यादनुत्तमे व्यङ्ग्ये" सू०।